प्रतिकूलेन विपर्य्ययक्रमेण वा चित्तं यथा येन प्रकारेण स्थिरमचपलं चाञ्चल्यरहितं स्यात् तथा प्राणमार्गं शोधयेदित्यर्थः । तेन किं स्यादित्यत आह । तत्रैव ३।२।१०॥

"मनोऽचिरात् स्याद्विरजं जितश्वासस्य योगिनः।
वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम्"॥

जितप्राणस्य योगिनः मनोऽचिरात् वह्निताषितलौहवत् अविद्याकामकर्म्मजनितमलं विषयसङ्गजनितपापनिचयमित्यर्थः विहाय विरजं निर्म्मलं स्यात् । इदानीं पूर्व्वोपदिष्टप्राणायामादिना केन कार्य्येण किं फलं स्यात् तत्सर्व्वं क्रमेण सूचयन् बोधयति । तत्रैव ३।२८।११-१२॥

"प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान्।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्॥
यदा मनः स्वं विरजं योगेन सुसमाहितम्।
काष्ठां भगवतो ध्यायेत् स्वनासाग्रावलोकनः"॥

प्राणायामद्वारा वातपित्तश्लेष्मादिदोषान् धारणया पापानि प्रत्याहारेण इन्द्रियाकर्षणेन विषयसंसर्गान् ध्यानेन अनीश्वरान् शोकमोहाभिमानदम्भक्रोधमात्सर्य्यादिदोषान् दहेदित्यन्वयः। अनेन विधिना यदा मनः स्थिरतां याति तदा युञ्जानो योगी प्रथमे धारणालम्बनस्वरूपां भगवतः काष्ठित् स्वाभीष्टां मूर्त्तिं ध्यायेदित्युपदिदेश भगवान् कपिलदेवः। इदानीं ध्येयमूर्त्तिं विवृणोति। यथा, तत्रैव ३।२८।१३—१८॥

"प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणम्।
नीलोत्पलदलश्यामं शङ्खचक्रगदाधरम्॥
लसत्पङ्कजकिञ्जल्कपीतकौषेयवाससम्।
श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम्॥
मत्तद्विरेफकलया परीतं वनमालया।
परार्ध्यहारवलयकिरीटाङ्गदनूपुरम्॥
काञ्चीगुणोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरम्।
दर्शनीयतमं शान्तम् मनोनयनवर्द्धनम्॥
अपीच्यदर्शनं शश्वत् सर्व्वलोकनमस्कृतम्।
सन्तं वयसि कैशोरे भृत्यानुग्रहकातरम्॥
कीर्त्तन्यतीर्थयशसं पुण्यश्लोकयशस्करम्।
ध्यायेद्देवं समग्राङ्गं यावन्न च्यवते मनः॥
स्थितं व्रजन्तमासीनं शयानं वा गुहाशयम्।
प्रेक्षणीये हि तं ध्यायेत् शुद्धभावेन चेतसा"॥

ध्येयमूर्त्तेः सकाशात् मनो यावत् विषयान्तरं न याति तावद्ध्यायेदितिभावः। गुहाशयं बुद्धितत्त्वे विराजमानं एवं निरन्तरध्यानेन साधकस्य चित्तं यदा भगवद्रूपे लब्धपदं भवेत् तदा चित्तस्य शनैः शनैः सौक्ष्मकरणाय मूर्त्तिं धारयित्वा भगवतश्चरणारविन्दादीन्येकैकाङ्गानि ततः सामरणान्यङ्गानि ततो विलासहासादीनि च क्रमेण यथाविधि ध्यातुमुपदिष्टवान् कपिलः। ततः किमित्याह। एवं चिरं ध्यात्वा योगी बहुजन्मार्जितसौभाग्यवशात् यदि हरौ प्राप्तभावो भक्त्या द्रवद्धृदय आनन्दार्णवे भासमानो भवेत् तर्हि तस्मिन् मूले भगवद्रूपे वडिशवत् संलग्नं चित्तं निर्गुणस्य परब्रह्मणः स्वरूपलाभार्थं तस्मादङ्गादिस्थूलरूपाद् वियोज्य निरालम्बनं निर्व्विषयं कृत्वा उपरतगुणप्रवाहः सन् धाताध्येयादिज्ञानाभावात् सर्व्वोपाधिपरिवर्ज्जितमेकमेवाद्वितीयमात्मानं पश्यत्येव। यथा तत्रैव ३।२८।३४-३५॥

"एवं हरौ भगवति प्रतिलब्धभावो
भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात्।
औत्कण्ठ्यवाष्पकलया मुहुरर्द्यमान-
स्तच्चापि चित्तवडिशं शनकैर्वियुङ्क्ते॥
मुक्ताश्रयं यदि हि निर्व्विषयं विरक्तं
निर्व्वाणमृच्छति मनः सहसा यथार्च्चिः।
आत्मानमत्र पुरुषोऽव्यवधानमेक-
मन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः"॥

ननु सुचिरं साधनेन सर्व्वेऽप्यात्मनि किमायातं। किन्तु श्रम एवेति चेत् न यतोऽनेकजन्मसाधनबलात् यदाऽखण्डमात्मानं ईक्षते स योगी सुखदुःखादिकं सर्व्वमहङ्कारनिष्ठं पश्यति तदा देहाद्युपाधिनिर्म्मुक्तो जीवन्मुक्तो भवेत्। यथा तत्रैव ३।२८।३६—३७॥

"सोऽप्येतया चरमया मनसो निवृत्त्या
तस्मिन् महिम्न्यवसितः सुखदुःखबाह्ये।
हेतुत्वमप्यसति कर्त्तरि दुःखयोर्यत्
स्वात्मन् विधत्त उपलब्धपरात्मकाष्ठः॥
देहञ्च तं न चरमः स्थितमुत्थितं वा
सिद्धो विपश्यति यतोऽध्यगमत् स्वरूपम्।
दैवादुपेतमथ दैववशादपेतं
वासो यथा परिकृतं मदिरामदान्धः"॥

जीवन्मुक्तस्य देहाद्युपाधिवर्गस्य निवृत्तौ तत्र मनःसंयोगाभावात् कथं देहादेर्व्वर्त्तनमिति शङ्कयन् स्वारम्भकं प्रारब्धबीजमेवेत्यर्थः देहादेः स्थितिकारणमित्याह। तत्रैव ३।२८।३८॥

"देहोऽपि दैववशगः खलु कर्म्म यावत्
स्वारम्भकं प्रतिसमीक्षत एव सासुः।
तं सप्रपञ्चमधिरूढसमाधियोगः
स्वप्नं पुनर्न भजते प्रतिबुद्धवस्तुः"॥

ननु यदि परब्रह्मणामायात्मसाक्षात्कारात्तमेव चरमं देहं मन्यसे तर्हि विद्यैव सुगमोपायः श्रूयते तस्मिन् सति कथं हथा कर्म्माड़म्बरे प्रवर्त्तयसे इति चेत् न कर्म्मविद्ययोरधिकारिभेदात् आदावीश्वरार्पितकर्म्मणा निष्कामकर्म्मणा वा चित्तशुद्धिं विना कुतो विद्यायामधिकारः। इत्यधिकारिभेदमुद्दिश्य ज्ञानकर्म्मणोः पृथक् प्रदर्शयितुं तत्त्वज्ञानमुपदिशन्तं भगवन्तं वासुदेवं पृष्टवान् जातसंशयोऽर्ज्जुनः। यथा गीतायां ३।१-१॥

"ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिर्जनार्द्दन।
तत्किं कर्म्मणि घोरे मां नियोजयसि केशव॥
व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्"॥

हे जनार्द्दन! चेद्यदि ते कर्म्मणः सकाशात् बुद्धिर्बोधः ज्ञानमिति यावत् ज्यायसी गरीयसी मता तर्हि कथं मां घोरे कर्म्मणि नियोजयसीत्यन्वयः। व्यामिश्रेण ज्ञानकर्म्मणोर्म्मिश्रीभूतेन वाक्येन कथं मे बुद्धिं मोहयसीव। इत्येवं विविधोरर्ज्जुनस्य संशयं निराकुर्व्वन्नाह भगवान् वासुदेवः। तत्रैव ३।३-४॥

"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ!।
ज्ञानयोगेन साङ्ख्यानां कर्म्मयोगेन योगिनाम्॥
न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति"॥

"अतः सम्यक्चित्तशुद्ध्यर्थं ज्ञानोत्पत्तिपर्य्यन्तं वर्णाश्रमोचितानि कर्म्माणि कर्त्तव्यानि अन्यथा चित्तशुद्ध्यभावेन ज्ञानानुत्पत्तेरित्याह न कर्म्मणामिति। कर्म्मणां अनारम्भात् अननुष्ठानात् नैष्कर्म्म्यं ज्ञानं नाश्नुते न प्राप्नोति। ननु "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इति श्रुत्या संन्यासस्य मोक्षाङ्गत्वं तर्हि संन्यासादेव मोक्षो भविष्यति किं कर्म्मभिरित्याशङ्क्योक्तं न चेति। न च चित्तशुद्धिं विना कृतात् संन्यसनादेव ज्ञानशून्यात् सिद्धिं मोक्षं समधिगच्छति प्राप्नोति इति तट्टीकाकृत् पूज्यपादश्रीधरस्वामी।

ननु कामं ईश्वरार्पितेन निष्कामकर्म्मणा चित्तशुद्धिः प्रजायते ततो ज्ञानं लब्ध्वा मोक्षमाप्नुयात् किन्तु भक्तिबलेनापि सत्त्वं संशोध्याचिरादेवाविद्याबन्धनात् मुक्तो भवेदित्यपि बहुषु शास्त्रेषु दृश्यते। सर्व्वेभ्यो हि भक्तिमाहात्म्यस्याधिक्यं प्रदर्शितं महात्मभिरतो बहुप्रयाससाध्यं कर्म्माड़म्बरं विहाय भक्तिपथाश्रयएव गरीयान्निश्रेयसार्थमिति चेन्न तदप्यधिकारिभेदेनोक्तत्वात् अर्च्चादावर्च्चनादिक्रियायोगसाध्यत्वाच्च। किञ्च पुरुषाणां निश्रेयसाय शास्त्रविहितमार्गत्रयं मुक्त्वा नान्यपरः पन्थाः क्वापि दृश्यते श्रूयते वा। तथाहि श्रीमद्भागवते ११।२०।६-८। तत्त्वजिज्ञासमुद्धवं प्रतियथोक्तवान् भगवान् वासुदेवः।

"योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
ज्ञानं कर्म्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्॥
निर्व्विण्णानां ज्ञानयोगो न्यासिनामिह कर्म्मसु।
तेष्वनिर्व्विण्णचित्तानां कर्म्मयोगस्तु कामिनाम्॥
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः"॥

यदृच्छया दैवगत्या। न निर्व्विण्णो न प्राप्तनिर्व्वेदः।

अतः सर्व्वत्रैव भिन्नभिन्नाधिकारमपेक्ष्य ज्ञानकर्म्मभक्तियोगादयो विहिताः। यथा तत्रैव ११।२० अध्याये २६॥

"स्वे स्वेऽधिकारे या निष्ठा सगुणः परिकीर्त्तित।
कर्म्मणां जातशुद्धानां अनेन नियमः कृतः"॥

यथा तत्त्वज्ञानार्थी निष्कृष्टसात्त्विककर्त्ता प्रथमतः केवलं अविद्याकर्म्मनिर्हारादीनुद्दिश्य निष्कामकर्म्मानुष्ठानमाचरति न जातुचित्तविशुद्धसत्त्वोऽधिरूढयोगो योगीव सहसा भेदबुद्ध्यादिकं परिहातुमर्हति तथा प्रथमं सगुणभक्तियोगाश्रयिणोऽपि न हि युगपत् भगवत्स्वरूपतत्त्वज्ञा निर्गुणभक्ता इव भगवत्प्रतिमार्च्चनादिक्रियायोगं परित्यक्तुं समर्था भवेयुः किन्तु तादृशेन सगुणभक्तियोगावलम्बिना दुर्ब्बलाधिकारिणा भगवत्प्रतिमापूजादिकर्म्मयोगएव कर्त्तव्यः इत्येतद्विहितं